MASTER SET
DO NOT REMOVE

# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीयपरीक्षा - प्रथमपत्रिका

पूर्वाह्णः १०.००तः १.००पर्यन्तम्

दिनाङ्कः - २७.०१.२०१९

अङ्काः -१००

समयः - होरात्रयम्

1. पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत । 5

   १. गणेशं के नमस्कुर्वन्ति ?

   २. बालिकायाः हस्ते किमासीत् ?

   ३. शङ्कराचार्यस्य मातापितरौ कौ ?

   ४. अचक्षुषां चक्षुः कः ?

   ५. शुकशावकयोर्नाम किम् ?

   ६. कौशिकः कीदृशो द्विजः आसीत् ?

   ७. कीदृशः पुरुषः न किञ्चित्कर्तुमर्हति ?

2. षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत । 12

   १. षट् दोषाः के ?

   २. कीदृशौ सुतौ वरम् ?

   ३. हनुमान् सीतां कथम् आश्वासयामास ?

   ४. भूतानां प्रलयोदयौ कौ ?

   ५. के के त्याज्याः ?

   ६. भुजङ्गमः रोषात् किमकरोत् ? परिणामः किमभवत् ?

   ७. मल्लः परिकरं बद्ध्वा राजानं किमुवाच ?

   ८. शङ्कराचार्यस्य शिष्याः के ?



Scanned by CamScanner

3. त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत । 9

१. वायसेन किमनिष्टं दृष्टम् ? तत्परिणामः कः ?

२. विष्णुशर्मणः प्रतिज्ञा का ?

३. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

४. मल्लस्य सामर्थ्यं विशदयत ?

५. द्रोणः एकलव्यं प्रति किमवदत् ? गुरुदक्षिणारूपेण किमयच्छत् ?

4. चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत । 16

१. हनूमता सीतादर्शनं, तस्यै तेन कृताश्वासनम् ।

२. चित्रग्रीवस्य कथा

३. विक्रमस्य औदार्यम्।

४. पतिव्रतायाः माहात्म्यम्।

५. कीदृशाय शम्भवे नतिः ?

5. चतुर्णां ससन्दर्भं मातृभाषया विवृणुत । 12

१. " मुखरः तत्र हन्यते "

२. " सर्पेण युक्तमेव कृतम् "

३. " अर्जुन ! त्वां लोकोत्तरं धनुर्धरं करिष्यामि "

४. " कुतो विद्यार्थिनः सुखम् "

५. " भवति भिक्षां देहि "

६. " गलं भित्त्वा अश्वाम "

6. द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत । 4

१. निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरेव न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥

२. जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति तेषां यशःकाये जरामरणजं भयम्॥



Scanned by CamScanner

३. गते तु रावणे सीतां विलपन्तीं स मारुतिः।
उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥

7. श्लोकद्वयं पूरयत । 4

१. शान्ताकारं ------------- नाथम् ।   ३. प्रत्यहं ---------- सत्पुरुषैरिति।

२. रविनिशाकरयोः------------- मतिः ।

8. गद्यस्य अस्य अनुवादं कुरुत । 4

शङ्करः यदा त्रिहायनोऽभवत् तदा तस्य पिता दुर्दैवात् कालवशं गतः। जननी पत्युर्वियोगेन खिन्नापि महातेजस्विशिशुरक्षणे बद्धादराभवत्। पञ्चमवत्सरे बन्धुभिः तस्य उपनयनं कारयामास। अनुपदमेव गुरुकुलमुपनीतः स वटुः द्वित्रैरेव वर्षैः सर्वान् वेदान् वेदाङ्गानि विविधाः भाषाश्च अधीतवान्।

9. रिक्तस्थानानि पूरयत । 4

१. नूनं ----------------- वल्मीकः ।   ३. -------- वोढुं सन्नाद्धोऽस्मि।

२. का त्वं बाले ?--------------- ।   ४. नीतिविदा पुरुषेण ------ न कथनीयम् ।

10. त्रयाणां पर्यायपदानि लिखत । 3

१. किङ्करः   २. विचक्षणः   ३. देवाः   ४. तोयम्

11. त्रयाणां विरुद्धपदानि लिखत । 3

१. बन्धनम्   २. सूक्ष्मः   ३. सृष्टिः   ४. शुभम्

12. वाक्यदोषं परिहरत । 3

१. भवान् वद ।   २. गुरुं नमः।

३. सीता रामस्य सह गच्छति।

13. त्रीणि पदानि संस्कृतवाक्येषु योजयत । 3

१. अमात्यः   २. द्राक्   ३. आवेद्य   ४. भवतु

Scanned by CamScanner

14. एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत । 3

१. ददर्श २. अभूत् ३. क्षीयते

15. सन्धिं विभज्य सन्धिनाम लिखत । 3

१. रामश्च २. स एवम् ३. इत्येनाम्

16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत (द्वे एव)। 4

१. चक्रार ------ पङ्क्तिः। ३. प्रक्षालनात् ------------ वरम्।

२. यादृशं -------------- तादृशी।

17. संयोजय लिखत । 4

| अ | आ |
|---|---|
| १. वाङ्मयम् | व्याधः |
| २. यमकिङ्कराकारः | विप्रः |
| ३. भूसुरः | सवर्णदीर्घसन्धिः |
| ४. अनिलात्मजः | विसर्गसन्धिः |
| | अनुनासिकसन्धिः |

18. प्रयोगं परिवर्तयत। ४

१. नाहं विद्याविक्रयं करोमि। २. ब्राह्मणपुत्रेण सर्पः लगुडेन शिरसि ताडितः।

३. तेन पूजा न कृता। ४. विष्णुशर्मा राजपुत्रान् पाठितवान्।

----------------



Scanned by CamScanner

श्रीसुरसरस्वतीसभा, शृङ्गेरी

तृतीयपरीक्षा - द्वितीयपत्रिका

दिनाङ्कः - २७.०१.२०१९ | अपराह्णः १.३०तः ३.०० पर्यन्तम्

समयः - सार्धैकहोरा | अङ्काः ५०

1. एकं विषयमधिकृत्य दशभिः वाक्यैः संस्कृतभाषायां प्रबन्धमेकं लिखत। 5

 १. कावेरी नदी  २. गौः  ३. वार्तापत्रिका

2. एकं विषयमधिकृत्य संस्कृतभाषायां पत्रमेकं लिखत। 5

 १. जन्मदिनमहोत्सवार्थम् आह्वयन् मित्राय पत्रम्।

 २. अनारोग्यनिमित्तं विरामं प्रार्थयन् मुख्योपाध्यायं प्रति पत्रम्।

3. द्वयोः लक्षणं सोदाहरणं मातृभाषया लिखत। 6

 १. तृतीयाविभक्तिः  २. कर्तरिप्रयोगः  ३. तुमुन्नन्ताव्ययम्

4. वाक्यदोषान् समीकुरुत। 3

 १. सीता रामस्य सह गच्छति।  ३. आपगाः पर्वतैः प्रवहन्ति।

 २. अजः वृकेण त्रस्यति।

5. द्वयोः रूपाणि सर्वपुरुषवचनेषु लिखत। 6

 १. भवेत्  २. वर्तताम्  ३. अशोभत

6. संस्कृतवाक्ये योजयत। 4

 १. इदानीम्  २. गतवान्  ३. प्रणम्य  ४. कृत्वा

7. सर्वविभक्तिवचनेषु लिखत। (एकमेव) 4

 १. विद्वस्  २. वणिज्  ३. राजन्



Scanned by CamScanner

2

8. वाक्यमेकं विवृणुत।

१. हितं मनोहारि च दुर्लभं वचः।

२. न हि कृतमुपकारं साधवो विस्मरन्ति

3

9. स्त्रीलिङ्गरूपं लिखत

१. कुर्वन् २. विस्मृतवान् ३. चत्वारः

2

10. एकस्य व्याकरणविशेषं लिखत।

१. प्रजाभ्य: स्वस्ति २. मह्यं रोचते

5

11. मातृभाषया अनुवदत

१. काशीक्षेत्रं सर्वैरपि प्रेक्षितुं योग्यम्।

२. वनवासाय रामेण सह गच्छन्तं लक्ष्मणं प्रति सुमित्रा अवदत्।

३. वालकाः अद्य क्रीडाङ्गणे क्रिकेट् क्रीडितवन्तः।

४. रजकः वस्त्राणि गृहीत्वा क्षालयितुं नदीं गतवान्।

५. विद्वांसः स्वदेशे परदेशे च पूज्यन्ते।

5

12. संस्कृतभाषायाम् अनुवदत

1. ಆಕಾಶದಲ್ಲಿ ಹಕ್ಕಿಗಳು ವೇಗವಾಗಿ ಹಾರುತ್ತವೆ. Birds fly swiftly in the sky.

2. ನಾವೆಲ್ಲರೂ ನಾಳೆ ಚಲನಚಿತ್ರವನ್ನು ನೋಡೋಣ. Let us see a movie tomorrow.

3. ಜನರು ಪುಣ್ಯಸಂಪಾದನೆಗಾಗಿ ತೀರ್ಥಸ್ಥಳಗಳಿಗೆ ಹೋಗುತ್ತಾರೆ.

People visit pilgrimages to earn merits.

4. ಒಣಗಿದ ಕೆರೆಯಲ್ಲಿ ಮೀನುಗಳು ಹೇಗೆ ಜೀವಿಸುತ್ತವೆ?

How can fish survive in a dry pond ?

5. ಕಪಿಯು ಎತ್ತರವಾದ ಮರವನ್ನು ಸುಲಭವಾಗಿ ಹತ್ತುತ್ತದೆ. Monkey easily climbs a tall tree.



Scanned by CamScanner